इन्द्रकील: कामगिरिरिति चान्ये शतसहस्रश: शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याता: । एतासामपो भारत्य: प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णावेणा भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्ध: शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूरोघवती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्य: । अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभि: शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्व्वा ह्येव सर्व्वेषां विधीयन्ते । यथावर्णविधानमपवर्गश्चापि भवति । योऽसौ भगवति सर्व्वभूतात्मनि अनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवे अनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिबन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्ग: । एतदेव हि देवा गायन्ति ।

"अहो वतैषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरि: ।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकस्पृहा हि न: ॥
किं दुष्करैर्न: क्रतुभिस्तपोव्रते-
र्दानादिभिर्वा द्युजयेन फल्गुना ।
न यत्र नारायणपादपङ्कज-
स्मृति: प्रमुष्टातिशयेन्द्रियोत्सवात् ॥
कल्पायुषां स्थानजयात् पुनर्भवात्
क्षणायुषां भारतभूजयो वर: ।
क्षणेन मर्त्त्येन कृतं मनस्विन:
संन्यस्य संयान्त्यभयं पदं हरे: ॥
न यत्र वैकुण्ठकथा सुधापगा
न साधवो भागवतास्तदाश्रया: ।
न यत्र यज्ञेशमखा महोत्सवा:
सुरेशलोकोऽपि न वै स सेव्यताम् ॥
प्राप्ता नृजातिन्त्विह ये च जन्तवो
ज्ञानक्रियाद्रव्यकलापसम्भृताम् ।
न वै यतेरन्न पुनर्भवाय ते
भूयो वनौका इव यान्ति बन्धनम् ॥
यै: श्रद्धया बर्हिषि भागशो हवि-
र्निरुप्तमिष्टं विधिमन्त्रवस्तुत: ।
एक: पृथङ्नामभिराहुतो मुदा
गृह्णाति पूर्ण: स्वयमाशिषां प्रभु: ॥
सत्यं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यत: ।
स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम् ॥
यद्यत्र न: स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ।
तेनाजनाभे स्मृतिमज्जन्म न: स्या-
द्वर्षे हरिर्यद्भजतां शं तनोति ॥

श्रीशुक उवाच । जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् । तद्यथा । स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दहरिण: पाञ्चजन्य: सिंहलो लङ्केति । एवं तव भारतोत्तमजम्बुद्वीपवर्षविभागो यथोपदेशमुपवर्णित: ।" इति श्रीभागवते महापुराणे ५ स्कन्धे द्वीपवर्षवर्णनं नाम १९ अध्याय: ॥

( विष्णुपुराणे च । २ अंशे ३ अध्याये ।

"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तत् भारतं नाम भारती यत्र सन्तति: ॥१॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! ।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् ॥"२॥

अपरञ्च ।

"अत: संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै ।
तिर्य्यक्त्वं नरकञ्चापि यान्त्यत: पुरुषा मुने ! ॥४॥
इत: स्वर्गश्च मोक्षश्च मध्यमन्तश्च गम्यते ।
नखल्वन्यत्र मर्त्त्यानां कर्म्मभूमौ विधीयते ॥"५॥

अपि च ।

"चत्वारि भारते वर्षे युगान्यत्र महामुने ! ।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ॥१९॥
तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विन: ।
दानानि चात्र दीयन्ते परलोकार्थमादरात् ॥"२०॥
"अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमय: ॥२२॥
अत्र जन्म सहस्राणां सहस्रैरपि सत्तम ! ।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥२३॥
गायन्ति देवा: किल गीतकानि
धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूय: पुरुषा: सुरत्वात् ॥२४॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते ।
अवाप्य तां कर्म्म महीमनन्ते
तस्मिंल्लयं येत्वमला: प्रयान्ति ॥२५॥
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम् ।
प्राप्स्याम धन्या: खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीना: ॥"२६॥)

भारती, स्त्री, ( भृ + अतच् । स्त्रियां ङीप् । ) वचनम् । ( यथा, कुमारे । ६ । ७९ ।
"तमर्थमिव भारत्या सुतया योक्तुमर्हसि ॥")
सरस्वती । ( यथा, कालिदास: ।
"वीणापुस्तकरञ्जितहस्ते
भगवति भारति देवि ! नमस्ते ॥")
पक्षिभेद: । वृत्तिभेद: । इति मेदिनी । ते, १३८ ॥ यथा,—
"शृङ्गारे कौशिकी वीरे सात्वत्यारभटी पुन: ।
रसे रौद्रे च वीभत्से वृत्ति: सर्व्वत्र भारती ॥"
भारती वृत्तिस्तु भारती संस्कृतप्रायो वाग्व्यापारो नराश्रय: । इति साहित्यदर्पणस्य ६ परिच्छेद: ॥ ब्राह्मी । इति राजनिर्घण्ट: ॥ ( शङ्कराचार्य्यशिष्यतोटकस्य शिष्याणामन्यतमस्य उपाधिविशेष: । यथा, प्राणतोषिण्यामवधूतप्रकरणे ।
"विद्याभारेण सम्पूर्ण: सर्व्वभारं परित्यजेत् ।
दु:खभारं न जानाति भारती परिकीर्त्तिता ॥"
नदीविशेष: । यथा, महाभारते । ३।२२१।२५ ।
"भारती सुप्रयोगा च कावेरी मुर्म्मुरा यथा ॥")

भारद्वाजं, क्ली, अस्थि । इति हेमचन्द्र: ।३।२८९॥

भारद्वाज:, पुं, ( भरद्वाजस्य अपत्यं गोत्रापत्यमिति वा । भरद्वाज + "ऋष्यन्धकवृष्णिकुरुभ्यश्च ।" ४ । १ । १०४ । इति अण् । ) द्रोणाचार्य्य: । ( यथा, महाभारते ।७।६। २३ ।
"तत: प्रयाते सहसा भरद्वाजे महारथे ।
आर्त्तनादेन घोरेण वसुधा समकम्पत ॥")
ऋषिभेद: । इति मेदिनी । जे, ३४ ॥ अगस्त्यमुनि: । इति शब्दरत्नावली ॥ मङ्गलग्रह: । इति ग्रहयज्ञतत्त्वम् ॥ व्याघ्राटपक्षी । बृहस्पतिपुत्त्र: । इति हेमचन्द्र: ॥ ( देशभेद: । यथा, "ककणपर्णाद्भारद्वाजे ।" ४ । २ । १४५ । इति सूत्रे "भारद्वाजशब्दोऽपि देशवचन एव नगोत्रशब्द: ।" इति काशिका ॥ भरद्वाजवंशीये, त्रि ॥ यथा, महाभारते । १ । १३१ । ३ ।
"इति सञ्चिन्त्य गाङ्गेयस्तदा भारतसत्तम ! ।
द्रोणाय वेदविदुषे भारद्वाजाय धीमते ।
पाण्डवान् कौरवांश्चैव ददौ शिष्यान्नरर्षभ ! ॥")

भारद्वाजी, स्त्री, वनकार्पासी । इति शब्दरत्नावली ॥ ( नदीभेद: । यथा, महाभारते । ६ । ९ । २९ ।
"शीघ्राञ्च पिच्छिलाञ्चैव भारद्वाजीञ्च निम्नगाम् ।
कौशिकीं निम्नगां शोणां बाहुदामथ चन्द्रमाम् ॥")

भारय: पुं, ( भां दीप्तिं रयते प्राप्नोतीति । रय गतौ + पचाद्यच् । ) भारद्वाजपक्षी । इति शब्दचन्द्रिका ॥ भारइ इति भाषा ॥

भारयष्टि:, स्त्री, ( भारस्य यष्टि: । ) भारवहनदण्ड: । वाँक इति भाषा । तत्पर्य्याय: । विहङ्गिका २ । इत्यमर: । २ । १० । ३० ॥

भारवं, क्ली, ( भारं वातीति । भार + वा + "आतोऽनुपेति ।" ३ । २ । ३ । इति क: । ) धनुर्गुण: । इति त्रिकाण्डशेष: ॥

भारवाह:, पुं, ( भारं वहतीति । वह् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ) भारिक: । इत्यमर: । २।१० । १५ ॥ (यथा, महाभारते । ३ । १३३ । १ ।
"अन्धस्य पन्था बधिरस्य पन्था:
स्त्रियाश्च पन्था भारवाहस्य पन्था: ॥")

भारवाही, स्त्री, ( भारवाह + गौरादित्वात् ङीष् ।) नीली । इति राजनिर्घण्ट: ॥